# shrI gopAlAShTottarashatanAmAvaliH

# श्रीगोपालाष्टोत्तरशतनामावली

## Document Information

Text title : gopAlAShTottarashatanAmAvaliH

File name : gopAla108.itx

Category : aShTottarashatanAmAvalI, vishhnu, krishna, nAmAvalI, viShNu

Location : doc_vishhnu

Transliterated by : N.Balasubramanian

Proofread by : N.Balasubramanian

Latest update : June 19, 2004

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 1, 2026

*sanskritdocuments.org*

# श्रीगोपालाष्टोत्तरशतनामावली

ॐ श्री गोपालबालतनयाय नमः ।
ॐ श्री गोपाय नमः ।
ॐ श्री गोपगोकुलनायकाय नमः ।
ॐ श्री गोपालाय नमः ।
ॐ श्री गोकुलनन्दनाय नमः ।
ॐ श्री गोपसंरक्षणोत्सुकाय नमः ।
ॐ श्री गोवत्सरूपिणे नमः ।
ॐ श्री गोपोषिअणे नमः ।
ॐ श्री गोपिकासुतरूपभृते नमः ।
ॐ श्री गोपीघृतदधिक्षीरशिक्यभाजनलुण्ठकाय नमः । १०
ॐ श्री गोपिकागण्डसंसक्तश्रीमद्वदनपंकजाय नमः ।
ॐ श्री गोपिकासंगमोल्लासाय नमः ।
ॐ श्री गोपिकाकुचमर्दनाय नमः ।
ॐ श्री गोपिकाऽक्ष्यंजनासक्तमंजुलाधरपल्लवाय नमः ।
ॐ श्री गोपिकारदनसन्दष्टरक्तिमाधरविद्रुमाय नमः ।
ॐ श्री गोपीपीनकुचद्वन्द्व मर्दनात्यन्तनिर्दयाय नमः ।
ॐ श्री गोपिकागानसंसक्तय नमः ।
ॐ श्री गोपिकानर्तनोत्सुकाय नमः ।
ॐ श्री गोपीसंभाषणरताय नमः ।
ॐ श्री गोपक्रीडामहोत्सवाय नमः । २०
ॐ श्री गोपीवस्त्रापहारिणे नमः ।
ॐ श्री गोपीकृतनखक्षताया नमः ।
ॐ श्री गोपिकासहभोक्त्रे नमः ।
ॐ श्री गोपिकापादसेवकाय नमः ।
ॐ श्री गोपिकाधवरूपाय नमः ।

ॐ श्री गोपस्त्रीवेषमूर्तिभृते नमः ।
ॐ श्री गोपीगानानुसरणमुरळीगानरंजकाय नमः ।
ॐ श्री गोपिकापुण्यनिवहाय नमः ।
ॐ श्री गोपिकाजनवल्लभाय नमः ।
ॐ श्री गोपिकादत्तसूपान्नदधिक्षीरघृताशाय नमः । ३०
ॐ श्री गोपीचर्चिततांबूलग्रहणोत्सुकमानसाय नमः ।
ॐ श्री गोपीभुक्तावशिष्टान्नसंपूरितनिजोदराय नमः ।
ॐ श्री गोपीमुखाब्जमार्ताण्डाय नमः ।
ॐ श्री गोपीनयनगोचराय नमः ।
ॐ श्री गोपस्त्रीपंचविशिखाय नमः ।
ॐ श्री गोपिकाहृदयालयाय नमः ।
ॐ श्री गोपीहृदब्जभ्रमराय नमः ।
ॐ श्री गोपीचरित्रगानवते नमः ।
ॐ श्री गोपस्त्रीपरमप्रीताय नमः ।
ॐ श्री गोपिकाध्याननिष्ठावते नमः । ४०
ॐ श्री गोपस्त्रीमध्यसंस्थिताय नमः ।
ॐ श्री गोपनारीमनोहारिणे नमः ।
ॐ श्री गोपस्त्रीदत्तभूषणाय नमः ।
ॐ श्री गोपीसौदामिनीमेघाय नमः ।
ॐ श्री गोपीनीरधिचन्द्रमसे नमः ।
ॐ श्री गोपिकालंकृतात्यन्तसूक्ष्माच्छोष्णीषकंचुकाय नमः ।
ॐ श्री गोपीभुजोपधानाय नमः ।
ॐ श्री गोपीचित्तफलप्रदाय नमः ।
ॐ श्री गोपिकासंगमश्रान्ताय नमः । ५०
ॐ श्री गोपीहृदयसंस्थिताय नमः ।
ॐ श्री गोपीपुल्लमुखांभोजमध्वास्वादनबंभराय नमः ।
ॐ श्री गोपस्त्रीदन्तपीड्याय नमः ।
ॐ श्री गोपिसल्लाप सादराय नमः ।
ॐ श्री गोपीवामांकसंरूढाय नमः ।
ॐ श्री गोपिकाभ्यंजनोद्यताय नमः ।
ॐ श्री गोपीभावपरिज्ञात्रे नमः ।
ॐ श्री गोपस्त्रीदर्शनोन्मीषाय नमः ।

ॐ श्री गोपिकासुतप्रीताय नमः ।
ॐ श्री गोपिकालिङ्गनोत्सुकाय नमः । ६०
ॐ श्री गोवर्धनाचलोद्धर्ते नमः ।
ॐ श्री गोदोहनलसत्कराय नमः ।
ॐ श्री गोवृन्दवीताय नमः ।
ॐ श्री गोविन्दाय नमः ।
ॐ श्री गोपिकागोपगोवृताय नमः ।
ॐ श्री गोपालाङ्गणसंचारिणे नमः ।
ॐ श्री गोपबालानुरंजकाय नमः ।
ॐ श्री गोव्रताय नमः ।
ॐ श्री गोपिकार्तिप्रदाय नमः ।
ॐ श्री गोनामभूषिणे नमः । ७०
ॐ श्री गोगोप्त्रे नमः ।
ॐ श्री गोपमानसरञ्जकाय नमः ।
ॐ श्री गोसहस्रालिमध्यस्थाय नमः ।
ॐ श्री गोपबालशतावृताय नमः ।
ॐ श्री गोवृन्दभाषाविजात्रे नमः ।
ॐ श्री गोपद्रव्यापहारकाय नमः ।
ॐ श्री गोपवेषाय नमः ।
ॐ श्री गोपनाथाय नमः ।
ॐ श्री गोपभूषणसंभ्रमाय नमः ।
ॐ श्री गोपदासाय नमः । ८०
ॐ श्री गोपपूज्याय नमः ।
ॐ श्री गोपालकशुभप्रदाय नमः ।
ॐ श्री गोपनेत्रे नमः ।
ॐ श्री गोपसखाय नमः ।
ॐ श्री गोपसंकटमोचकाय नमः ।
ॐ श्री गोपमात्रे नमः ।
ॐ श्री गोपपित्रे नमः ।
ॐ श्री गोपभ्रात्रे नमः ।
ॐ श्री गोपनाय नमः ।
ॐ श्री गोपबन्धवे नमः । ९०

ॐ श्री गोपपुण्याय नमः ।
ॐ श्री गोपसंतानभूरुहाय नमः ।
ॐ श्री गोपालानीतदध्यन्नभोक्त्रे नमः ।
ॐ श्री गोपालरञ्जकाय नमः ।
ॐ श्री गोपालप्राणधात्रे नमः ।
ॐ श्री गोपगोपीजनावृताय नमः ।
ॐ श्री गोकुलोत्सवसंतोषाय नमः ।
ॐ श्री गोदधिक्षीरचोरकाय नमः ।
ॐ श्री गोवर्धनरताय नमः ।
ॐ श्री गोपीगोपाह्वानकृतादराय नमः । १००
ॐ श्री गोग्रासधारिणे नमः ।
ॐ श्री गोकंडूनिवारणनखावलये नमः ।
ॐ श्री गोहिताय नमः ।
ॐ श्री गोकुलाराध्याय नमः ।
ॐ श्री गोगोपीजनवल्लभाय नमः ।
ॐ श्रीमते नमः । १०६
॥ श्री गोपालाष्टोत्तरशतनामावलिः संपूर्णा ॥

॥ ॐ तत्सत् ॥

Encoded and proofread by
N. Balasubramanian

*shrI gopAlAShTottarashatanAmAvaliH*
pdf was typeset on March 1, 2026

Please send corrections to *sanskrit@cheerful.com*